२१८१

नं. — २१८१

नाम — कात्यायन छन्त्र व्याख्यानं १८शा ध्याय:

कर्ता — श्री याज्ञिक देव:

पत्र सं. — ३४ सं. — x

विषय — छन्त्र पद्धति परिशिष्टं

/

कात्यायनसूत्रव्याख्यानैकोनविंशाध्यायः

५१८१

२२००

१५

एकोनविंशति

पत्र ३९

दे० भा० सू: १९ श्रीगणेशायनमः॥ ऋतिमं क्रमानुसारिणाचार्येणाग्निरनुविहितः। इदानीं तदंगभूतां सौत्रामणी
१ मनुविधत्ते। ब्राह्मणायज्ञः सौत्रामण्यृद्धिकामस्य। ब्राह्मणस्य यज्ञो ब्राह्मणायज्ञः। सौत्रामणी
संज्ञो यज्ञो [illegible] ब्राह्मणस्यैव भवतीत्यर्थः। तस्माद्ब्राह्मणायज्ञ एव सौत्रामणीतिवचनात्॥
कीदृशस्य ब्राह्मणस्य। ऋद्धिकामस्य। नानुमजिष्ये विजिष्ये सत्यजित्यै जित्वा इति क्षत्रियस्य संनुष्ठे
विपुष्ये सत्यपुष्ये इति। वैश्यस्यापि क्षत्रियवैश्ययोरपि सौत्रामण्यां सामगाने निधनवि
शेषविधानदर्शनात्तयोरपि सौत्रामणी भवतीति प्रतीयते। ततः कथमुच्यते। ब्राह्मणायज्ञ इति
अत्रोच्यते द्विविधा सौत्रामणी। अग्न्यंगभूता एका। अपराकाम्या। तत्र या अग्नेरंगभूता। सा
तु क्षत्रियवैश्ययोरपि भवति। तद्विषयं च निधनविशेषविधानं। या च काम्या सा [illegible] ब्राह्म पु
णस्यैव नेतरयोरिति। अत एवाह वासुदेवः। अग्नि[illegible] वित्रियमेनैव तेनानंतरमुच्यते सौत्रामणी
५६ प्रसंगेन काम्याप्यभिधीयत इति। तथा ब्राह्मणग्रहणान्नेयं काम्या क्षत्रियस्य च। साग्निक
स्याधिकारेणानिधनेर्थवती स्यादिति। सौत्रामणीविवक्षमाणस्य कर्मणः संज्ञा। सा
च ययोग्रहसुराग्रहयागानां इतिकेचित्। कुतः सुत्रा[illegible]इयं सौत्रामणीत्येवं सुत्राम
संबंधेन सौत्रामणीत्यन्वर्थसंज्ञा विज्ञानात्। इंद्राय सुत्राम्णे सुरासोमेभ्योऽनुब्रूहीति ग्रह मो
यागेष्वेव सुत्रामशब्ददर्शनात्। तथा च ग्रहन रस्वामिन आहुः। सौत्रामण्यां तु चोदना राम
सामान्याद्दर्शपूर्णमासकालेन भवितव्यमिति। माधवाचार्या अपि सौत्रामण्याः १

षिविकारत्वात्सर्वकालस्थ्योदकप्राप्त इति। अयमूनामेव सौत्रामणी शब्दवाच्यत्वं चैवे
न्नापपद्यते। सा एतमाश्विनं धूम्रमालभेतेत्यादयस्त्रयः पशव एव सौत्रामणीशब्दवा
च्या इति हरिस्वामिने यज्ञिषः। कर्काचार्यस्त्वाग्रहयागास्तु पशुपुरोडाशयागवत्पशु
देवतासंस्कारार्थाः॥ पशुपुरोजशयागास्तु अन्यदेवत्यत्वादप्राज्ञतकार्या इति मीमांस
का। तथा च श्रूयते। ग्रहपुरोडाशा ह्येते पशव इति। आश्विनादयो ग्रहा एव पुरोडाशाः प
शुपुरोडाशकार्यकारिणो यतस्ते ग्रहपुरोडाशभूता इति। तस्मादाश्विनादिपशव एव सौत्रा
मणीशब्दवाच्याः प्रधानभूताश्चेति युक्तः। अतोन्यदिष्टिपश्वादिकं तदंगं ज्योतिष्टो
मेदीक्षणीयाग्नीषोमीयादिवत्। तथा चाह श्रुतिः आत्मा वै यज्ञस्य सौत्रामणी बाहू ऐं
द्रश्च वयो धाश्चेति। तथैतत् सौत्रामणिकं पूयमेतौ पूपावभितो भवत इति च। ननु
उभयं वै सौत्रामणी इष्टिश्च पशुबंधश्चेति अवयवसमुदायस्य संज्ञा कृता भवति।
तथा सति सौत्रामण्यामिष्टिपशवो भिन्नतंत्राः कालभेदादिति सूत्रे सप्तमी श्रुति रूप
पन्ना भवति। अत्रोच्यते। इष्ट्यादीनामंगत्वे प्युभयरूपत्वं न विरुध्यते। सौत्रामण्या
मित्ययं सप्तमीनिर्देशोपि प्रकरणोपलक्षणार्थः॥ चिंताया एतत्प्रयोजनं। अंतराये
प्रधानस्यैव प्रयोक्तृत्वं नांगानामिति। ऋद्धिकामव्यतिरिक्तानामपि सौत्रामणी
माह॥ अग्निचित्सोमयाजी सोमातिपूत सोमवामिनां। असिचितः साग्निचितः

साग्निचित्सोमयागसमाप्त्यनंतरं आगामिनि यजनीयेतदंगभूता सौत्रामणी भ-
वति। अग्निं चित्वा सौत्रामण्या यजेतेति वचनात्। तथा सोमयाजिनः अग्निरहितेना-
पि सोमयागेनेष्टवतः सौत्रामणी भवति। सोमेनेष्ट्वा सौत्रामण्या यजेतेति श्रु-
तत्वात्। केचिदग्निं चित्वेत्यस्यैव विशेषणं मन्यते। अग्निमता सोमेनेष्ट्वेति। तन्म-
ते साग्निचित्यस्यैव सोमस्यांगं सौत्रामणी नेतरस्येति। तथा सोमातिपूतस्य प्राय-
श्चित्तार्थं सौत्रामणी भवति। यस्य यजमानस्य पीतः सोमो मुखव्यतिरिक्तेभ्यो
नासिकाकर्णगुदादिच्छिद्रेभ्यः स्रवति स सोमातिपूत इत्युच्यते। तथा सोमवामि-
नश्च सौत्रामणी भवति। मुखेन यः सोमं वमति स सोमवामी। सोमातिपूतसोमवा-
मिनो ब्राह्मणावेवानयोरेव सोमपानस्य संभवात्। ननु क्षत्रियवैश्ययोरपि न्यग्रो-
धस्य सोमस्थानापन्नत्वात् सोमधर्मलाभे सति न्यग्रोधवमनेतिपवने च सोम-
वत्प्रायश्चित्तं कस्मान्न भवति। उच्यते। नायं सोमधर्मः किंतु सोमातिपवने च या-
गांतरविधिस्तन्न भवति। अग्निचितस्त्रैवर्णिकस्यापि भवति। अग्निं चित्वेत्यस्यां-
गत्वेन विधानात्। केवलसोमांगत्वपक्षे त्वेवमेव॥ राज्ञोपरुद्धस्य चापरुद्ध-
स्य स्वराज्यात् प्रच्यावितस्य राज्ञः स्वराज्यप्राप्त्यर्थं सौत्रामणी भवति। दुष्टरीतुर्ह
पौष्टं सायनो दशपुरुषं राज्यादपरुद्ध आसेत्यादिश्रवणात्॥ अलंपशोरप

शोध्यो ऽपशोः न विद्यते पशवो यस्यासावपशुः। तस्यापशोः पशुप्राप्त्यर्थं सोऽत्रा
मणी भवति। कीदृशस्यापशोः। अलंपशोः। पशुभ्य अलं भरणादिसमर्थः। पशु
प्राप्तियोग्यः अलंपशुः। तस्यालंपशोः। यो वालं पशुभ्यः सन् पशून्न विन्दत इति श्र
वणात्। एवमधिकारिणानुपदिष्टाः अधुनात्र वक्तव्यमाह॥ आदित्यश्चरुः।
तत्र सौत्रामण्यां प्रथमं आदित्यादितिदेवताकश्चरुर्भवति। आदित्यं चरुं यस्येणा मा ५
निर्वपतीति श्रुतत्वात्। इयं वा अदितिरिति वाक्यशेषाद् अदितिर्देवता। अत एव प्रा
पस्तं च नतो नमदित्यै च रुरम्यापीति अदितिश्चोपांशु भवति। उपांशुदेवते षिष्टि
ति वक्ष्यमाणत्वात्॥ अंते च। अंते सौत्रामण्या अंते समाप्तौ चादित्यश्चरुर्भवति। आ
दित्समीजान इति श्रवणात्। ईजान इष्टवानित्यर्थः॥ आमिक्षाया वा पूर्वं॥ त्रिपशुस
माप्यनंतरं या यस्यावि हितास्ति उदवसायपयस्यामैत्रावरुणीति। सा अत्रामिक्षा
ब्नोच्यते। अतः य आदित्यश्चरुः स आमिक्षायां मैत्रावरुण्याः पयस्यायाः सर्वः प्रथ
मो वा भवति। तस्याः परो वा। उभयथाश्रुतत्वात्। पूर्व एवेत्यन्ये॥ धेनुर्दक्षिणाऽप्रा
यश्चित्तं क्रियमाणस्य आदित्यस्य चरोर्धेनुर्दक्षिणा भवति। सवत्सा गौर्धेनुशब्दे
नोच्यते। तत्र विभागेन दानमाह॥ वत्सः पूर्वे प्रथमे आदित्यचरौ धेनोर्वत्सो द
क्षिणा भवति। वत्सं पूर्वस्याद् ददातीति श्रुतत्वात्॥ मातोत्तरे। उत्तरे अंते क्रियमाणे आदि

देवभाःअ॰१९ सचैवैमाता ह्यर्वस्मि न्नादि सचैवोदत्तस्य च तस्य माता दक्षिणा भवति। मातरमुत्तर
३ स्यामितिवचनात्॥ अभ्यादधामीतिप्रत्यचमाहवनीयेति सूः समिधोभ्यादधाति।
आदित्येषिं समाप्य तेिप श्वर्थमाहवनीय दक्षिणा यीवि हत्यान्य न्वाधानं ब्रह्मवर
णांचकृत्वा अभ्यादधामीति प्रत्यचं यजमान आहवनीयेति सू: समिधोभ्याद
धाति। वृतंचर अग्ने व्रतपते मीथेलादौहिता अहमित्यादि मंत्रलिंग्य यजमानस्य स
मिदाधानकर्तृत्वं॥ सत्यवादी॥ आकर्मपरिसमाप्तेः। यजमानः सत्यवादी स्यात्।
दृष्ट्विपशुषुचप्रज्ञातितः प्राप्तमेवसत्यवादित्वं अयं तंतरल धर्मः। अत इष्टिपशुव्यति
रिक्तेकालेसत्यवादित्वमनेनविधीयते। तेनेष्ट्यादिषु व्रतग्रहणं भवति॥ हुतोच्छि
ष्टभक्षः यजमानाहुतोच्छिष्टभक्षोऽग्निलोत्रहोमशेषभक्षः स्यादित्यर्थः। तदेवाश
नकुर्यात् निर्दिसादित्यर्थः। अतश्च यदशृपां प्रातरग्निलोत्रं हुत्वा स्थाली ... स्थाप्या हुतशे
षस्यस्थापनं। तस्यापरादेकसूरणं। एवमेवसायमप्यग्निहोत्रहोमानंतरं हुशेषस्या त
शनं॥ सत्यानुभुक्तायां पत्नी तुहविष्यमात्रमश्नीयादितियाज्ञिकाः। हुतोच्छिष्टमेव
तिवासुदेवः॥ चतूरात्रं। एतत्त्वस्मात्तं सौत्रामणीसंज्ञंकर्म चतूरात्रं भवति। ऐंद्रस्य प
शोरादित्येष्ट्यादिनभेदेनानुष्ठानं माभूदितिचतुरात्रमित्युक्तं॥ अग्निहोत्रं जुहो
तिरंधेलादौहिते अहमितिमंत्रलिंगात्। पयसादध्नायवदोदनेनसोमः शवद्भूवन्य राम
३

पर्यंतेष्वकथं सौत्रामणी सोमयज्ञो भवतीति पशुपूर्वकसौत्रामण्याः सोमयज्ञ
त्वप्रतिपादनाद्धविर्यज्ञत्वदग्निहोत्रप्रतिषेधाशंकायां तस्यप्रतिप्रसवः क्रियते अग्नि
होत्रं जुहोति। अत्र सौत्रामण्यां यजमानः स्वयमेवाग्निहोत्रं जुहोति। प्रतिषेधाभा
वात् स्वयं होमार्थं पुनर्वचनमिति कर्कः॥ ऐंद्रः पशुः इंद्रदेवत्यः पशुः कर्तव्य इति सूत्र
शेषः बाहूऐं[?] अश्विनयोर्धाम्नेति अवदानं। स च त्रिपशुदेशादुत्तरेण तत्तस्यां कर्तव्यो
यथात्रिपशुष्वपाघर्जविनाश्यपूयो भवति तथा चव स्यातिमध्ये यूपाद्दक्षिणोत्तरावे
द्वावायोर्धसयोरिति। अयं चोपांशुकर्तव्यः। ऐंद्रः सौत्रामण्यां प्रथम इति प्रागुक्तत्वात्॥
चरुपश्वोर्विपर्यासमेके। एके आचार्या अश्वरूपश्वोः आदित्यस्य चरोरैंद्रस्य पशोश्च
विपर्यासमिच्छंति सर्वपशुः पश्चाच्चरुरिति। आलाभे यज्ञस्य सौत्रामणी बाहू ऐं
द्रश्च वयोधाश्चेति पशोबर्हिषेन संस्तवात्। तस्याहिकदौ चरुरिति चरोकत्वात् संस्तवात्।
अंतर्बर्हिर्भवमवलंब्यायं संस्तव इति ननु यथैव मस्ति तर्हि चरुः प्रथमं कर्तव्यमुपपद्
यः। आदित्यं चरुं यस्य समारोहणं निर्वपतीति वाक्यादिति तर्हि विपर्यास द्वेय स्यमाणा र
त्स्यका गतिः प्राक् त्रिपशुकालात् यस्य मृगरुल्लुणप घतां एवा। अतः सर्वपशुः। तत
श्चरिरेवमेवानुष्ठेयः। अथ सुरासाधनभूतानां द्रव्याणां क्रयणप्रकारमाह॥ अंतः
पात्यस्थाने चर्मणि सुरासोमविक्रयिणः सीसेन शष्पाणि क्रयस्तोक्मानां मूर्गाभेत्ती ५४

दे० भा० ४

ज्ञानार्थं सर्वैः सुरासोमविक्रयिं क्रय्यास्तिसुरासोमाइ इत्यामंच्यामंत्र्य सर्वेषु। अत्र च सोम
वेघ्रदिकरणां वस्यति तेनाच सोमवदेवांतः पासस्य स्थानमुक्तिते नैव मुपादिश्यते अत्र
तः पासस्थानेगोचर्मणि सुरासोमविक्रयिणः सकाशात् सीसेन शष्पाणां क्रयः कर्त्त
व्यः। शष्पशब्देन विरूढा व्रीहयउच्यंते। केचिच्छष्पशब्देनालत्तृणां वाचकमाहुः। त
था तृणाभिमेषरोमभि[illegible]क्यानां क्रयः कर्त्तव्यः विरूढा यवास्तोक्मशब्देनाभिधी
यंते। तथा सूत्रे तोक्मानां व्रीहीणां क्रयः कर्त्तव्यः। किं कृत्वा सर्वेषु क्रयेणाय्
सुरासोमविक्रेपिक्रय्यास्तिसुरासोमाइत्यनेनमंत्रेण आमंत्र्यामंत्र्य सुरासोमविक्रयि
णः। य ष्ट्रा। सर्वग्रहणां नयन्हुर्स ज्ञकस्यनयहुचूर्णानि क्रत्वे स्यत्रवस्य माणा स्य सुरा
साधनभूतस्याकिएवापारपर्याय स्यसर्जत्वेगाघोषधजातस्यामंत्रणा पूर्वकमे
वानियतद्रव्येणा क्रयमाणः शस्यार्थे। तस्याभिधानत्वसामान्येनतदपेक्षणात्
तच्चैवं शास्त्रांतरे प्रसिद्धं सर्जत्वक्त्रिफलाचैव शुंठीचैवपुनर्नवा चतुर्जातकसंयुक्तंपि
प्पलीगजपिप्पली। वशाबकाबहछत्राविचवंचैं दूवारणी। अश्वगंधासमुत्पा घमला
न्यैतान्निर्दिशेत। धान्यकं वयवानीं च जीरकं कृष्णजीरकं छलरिद्ववचाचैव। विरूढ
व्रीहयो यवः इति सीसेन क्रीणा सुपरिश्रितसुराद्रव्यं क्रीणातेति मानव। तत्रैवं प्रयोगः
प्रथमरेंद्रपशुः ततआग्निलेखिः ततस्त्रिय ष्वर्थभालायांपुनर्गीविहत्याग्मन्वाधा राम ४

नवनीतवरणाव्रतग्रहणानि समंत्रकाणि कृत्वा भ्याद ध्यमो त्वाहवनीये समिदाधानानं
तरं मंतः पात्स्य देशे गोचर्म प्राग्ग्रीवमुत्तरलोमास्तीर्य तस्योपरि शष्पतोक्म लाजाननग्नहु
संज्ञानि कृष्णानि धापय विक्रयिणाय छति सुरासोमविक्रयिक्रयास्ते सुरासोमा इ
ति तेन प्रस्तुक्ते सीसेन शष्पाणि क्रीणामीति तं प्रस्तुत्वा सीसं तस्मै समर्प्य विरुदान
व्रीहीनाहीत्वा तत्समीपे स्थापयेत। एवमेव पुनरामंत्र्योर्णाभिस्तोक्मानि क्रीणामीति सु
रासोमविक्रयिणं प्रस्तुत्वा जर्णास्तस्मै समर्प्य विरुदाम्यवानादाय तत्समीपे नि
दध्यात। एवमेव पुनरामंत्र्य सू[illegible]त्रैर्लोम्नो क्रीणामीति तं प्रस्तुत्वा सूत्राणि तस्मै दत्वा
लाजानादाय तत्समीपे निदध्यात। पुनरप्यामंत्र्य तत् क्रीयुर्दिनानि येत दृष्टेणानग्र
हुक्रयणं कार्यं। सुरारूपं सोमं यो विक्रीणीते स सुरासोमविक्रयी॥ क्लीबो देके। एके
स्त्वाचार्याः क्लीबा नपुंसका छष्पादीनां क्रयणमिच्छंति नु सुरासोमविक्रयिणः पु
रुषान्। तद्वितदन्यं धर्य वा सीसेन क्लीबाच्छष्पाणि क्रीणंतीति श्रुतेः॥ दर्विशाने ह
त्वानयुरु चूर्णानि ज्ञात्वा तांश्च व्रीहिं श्यामाकौदनयोः पृथगाचामैनि षिच्य चूर्णैः सह
सज्यानि दधुति तस्मात्सर्वं क्रयणानंतरं तानि श्रष्पादीन्यादाय दर्विशाने द्वारे गार्ह
त्यम्य गारं प्रविश्य पत्र्वन येरु चूर्णानि ज्ञात्वा सत्तलगाघो पधमध्धाग्निन क्षीपि
घ्रातान्नराष्पतातेम लाजानच सर्वं पिवा चूर्णे ज्ञात्वा दर्शे तस्मै मासधर्मेणा पात्रसाद

दे भा० ५

नादिव्रीहिश्यामाकचतुर्मुष्टीकग्रहणापूर्वकफलीकरणांतं समंत्रकं ज्ञात्वा बहुतरोदकं पश्चात्र
पत्न्यभ्यतालंभनानंतरं व्रीहिश्यामाकौदनयोः पृथगाचामौ निर्मिच्य पृथग्भिन्नयोः पात्रयो
श्रवींमे ध्याददतिरिक्तमुस्तोदकमवस्राव्य तदुदकेन नग्नहुप्रभृतिभिश्चतुर्भिश्चूर्णैः संस
ज्यानिदधाति स्थापयति तन्मासरं तस्य चूर्णसंसृष्टस्याचर्मा समासरमिति संज्ञा। मास
रकुंभं प्लावयतीत्येवमादौ संव्यवहारार्था। अत्र चूर्णैः संसृज्येति चूर्णानां संसर्जनमा
त्रं वचनात्संस्कारार्थं ते वामप्रदेयद्रव्यत्वं। अतो व्रीहिश्यामाकाभ्यामेव प्रधानभूताभ्यां
सुरा निष्पाद्यते सा च यागसाधनं। अतो द्रव्यसामान्यात्पौरोडाशिकाश्चतुर्मुष्टिकग्र
हणादयो धर्मा अत्र भवंति तत्र संदेहः किमेकं चतुर्मुष्टीकं ग्राह्यं उत त्रीणीति एक
प्रदानत्वादेकमेवेति केचित् केचिन्नेत्यपरे अग्नेस्त्रयाणां ग्रहाणां पृथग्ग्रहणाग्निधाने
न यथा पृथग्द्रव्यदेवतासंबंधावगमात्सप्तदशप्राजापत्यानिति वत्सवनीय
पुरोडाशादिवच्चैकप्रदानतोपपत्तेस्त्रीण्येव चतुर्मुष्टीकानि ग्राह्याणि अश्विभ्यां
जुष्टं सरस्वत्यै जुष्टमिंद्राय सुत्राम्णे जुष्टमिति व्रीहिश्यामाकयोर्मिलितयोः सुरानि
ष्पादनार्थत्वान्मिश्रीकृत्योभौ त्रीण्येव चतुर्मुष्टीकानि गृहीत्वा साधयेत्ता वालेन
न पृथक्कृत्य कंडनादि पाकांतं कुर्यात्। चरकसौत्रामण्यां तु एकग्रहग्रहणापत्ते
एकस्य चतुर्मुष्टीकस्य ग्रहणं युक्तं। तत्रापि त्रीन्वेति पदत्रीण्येव चतुर्मुष्टी

राम ५

म्णे ४

कानिग्राह्याणि ॥ उदनौ चूर्णमासरो सर्वः सं[stain]स्वाहींत्वादः प्रुनातरति त्रिरात्रं नि
धा २ द[stain]ति। एवमाचामयोश्चूर्णासे सर्गानंतरमोदनौ चतुर्भिश्चूर्णैः सं[stain]सृज्य स्वा
हींत्वादः प्रुनात इति द्वाभ्यां मंत्राभ्यां एकस्मिन्महति पात्रे चूर्णासंसृष्टावोदनौ मा
सराय्याच संसृज्य त्रिरात्रं निदधाति सुगुप्तदेशे स्थापयति शालायां नैर्ऋ[stain]तकोणे
गर्त्ते खात्वा खातं च स्थापयतीति जीर्णाः संप्रदायः तिस्रो रात्रीर्वसतीति स्रो हि रात्रीः
सोमः क्रीतो वसति सोमरूपमेवेनं करोतीति श्रुतत्वात्। अत्रैवं कर्म ॥ चवोमभेरि
त्यालंभनानंतरमुद्वासनां पृथग्द्वयोराचामानयेकः। ततः शुष्यचूर्णस्य चतुर्थी
यांशमादायतत्तृतीयांशं द्वे[stain]धा विभज्यैकैकं भागमाचामयोः प्रक्षिपेत्। [stain]ततस्तो पे २
का चूर्णस्य चतुर्थांशं द्वेधा विभज्याचामयोः प्रक्षिपेत्। एवमेव लाजचूर्णानां चतुर्थी
यांशं द्वेधा विभज्याचामयोः प्रक्षिपेत्। ततो नग्नहुचूर्णस्यार्द्धं द्वेधा विभज्या धा
चमयोः प्रक्षिपेत्। तस्य च चूर्णसंसृष्टस्याचामस्य मासरमिति संज्ञा ॥ ततो द्विती
यं शुष्यचूर्णस्तृतीयांशं द्वे[stain]धा विभज्यैकैकं भागमोदनयोः प्रक्षिपेत्। एवमेव तोक्म
लाजचूर्णतृतीयांशं चाततो नग्नहुचूर्णस्यावशिष्टमर्द्धं द्वेधा विभज्योदनयोर्म
ध्ये प्रक्षिपेत्। तत उदनयोरेकस्मिन्महति पात्रे करणं ततः आचामयोरप्येत
स्मिन्नेव पात्रे निक्षेपः। ततः स्वाहींत्वा[stain]प्रुनातरति द्वाभ्यां मंत्राभ्यां उदनयोश्च

दे०भा० समासरैः महाञ्जलनेन संसर्गः कार्यः। स्वाद्वीं त्वा स्वादुना तीव्रां तीव्रेण संदधमीति श्रु
६ तेः संधानं च संयोजनं संसर्जनं मिश्रणमित्यर्थः कृतः आथर्वणेषु परिस्रुत
ढः संदधमीति श्रुतेः। शिल्पाणि क्षत्रं वेति संठ सृजतीति सूत्रणात्। अतोऽत्रापि स्वाद्वीं त्वा
द‍ः मधुनां तु इतिमं त्रा भ्यां मोदनो चूर्णा मासरैः संसृज्येत्येवमेवान्वयः कार्यः।
ततस्तिरात्रं निदधातीमं त्राभावन्तु लोमे वत स्यपात्र स्य गर्ते निखन्य संतस्याऽध्य चूर्ण
तोकर्म चूर्ण लाज चूर्ण लतीयां शानां यन्त्रे नरहरां प्रतिदिनं सुरायामावायार्थं॥
एकस्याः पयसा पात्रे कृते नाश्विनेन परिषिंचति परीतो षिंचतेति। होमानंतरं रात्रौ ए
कस्या गोः पयसा गो दुग्धेनाश्विने नापाकृतेन [illegible] पयाम पाकरोमीति हस्ते नैव
तां गां स्यच्छ्वदोहयेत। एवं अपाकृत्यायास्त स्याः गोः पयसा सुरां परिषिंचत्स धर्षुः
यरीतो षिंचतेतिमंत्रेण। आश्विनेन पयसा प्रथमां रात्रिं परिषिंचतितथा ए ती
कस्या दुग्धेन प्रथमां रात्रिं परिषिंचतीति श्रुतत्वात्। एतच्च परिषेचनं सायमग्नि
होत्रहुतेकार्यं तथा च कसूत्रे। हुते सायमग्निहोत्रे परीतो षिंचतेति गो दुग्धेन सु
रां परिषिंचति द्वयोर्द्वितीयस्यां तिसृणां तृतीयस्यां प्रति प्रस्थाता सुराकर्म करोती
ति॥ शष्पचूर्णानि चावपति पयसा सुरायाः परिषेकानंतरं सुराभांडमध्ये श राम
ष्पचूर्णान्यवशिष्टान्यावपति प्र[illegible]क्षिपति। प्रातः सवनस्येत दूयंय घष्य ६

रीत्यादि श्रुतत्वात्॥ सारस्वतेन ग्रहयोः प्रातः प्रातःशब्देन श्वोऽभिधीयते ते न द्विती
येऽहनीत्यर्थः। प्रातः श्वः द्वितीयेऽहनि रात्रौ सारस्वते न्याय्याहृतेन ग्रहयोर्ज्योः पयसा सु
रां परिषिंचति परीत इति सारस्वतेन पयसा द्वितीयां रात्रिं परिषिंचति ग्रहयो दु
ग्धेन द्वितीयां इति श्रुतेः। अत्र दोहस्पूर्वं सरस्वत्या अपाकरोमीति हस्तेनैव ग्रहा
र्ज्योः प्रत्येकं स्पर्शं कृत्वा दोहनं एकत्र कृत्वा परिषेकः॥ तोक्मचूर्णानि च। अवशि
ष्टानि तोक्मचूर्णानि च दुग्धासेकानंतरं सुरायामावपति ग्रहद्वयं मासं ध्वंस्म
स्यैतत्सवनस्य रूपं यत्तोक्मानीति श्रुतेः ऐन्द्रेणोत्तमे तिसृणां मुत्तमे च तो येऽह
नि रात्रौ ऐन्द्रेणाप्याहृतेन तिसृणां गवां पयसा सुरां परिषिंचति परीत इति ऐन्द्रेण
पयसा तृतीयां रात्रिं परिषिंचतीति श्रुतेः तिसृणां दुग्धेन च लोमानीति च॥
अत्रैन्द्राय सुत्राम्णे। पाकरोमीति हस्तेनैव तिसृणां गवां स्पर्शः एकत्र कृत्वा सकृदेवा
सेकः॥ लाजचूर्णानि च। अवशिष्टानि लाजचूर्णानि च सुरायामावपति। दुग्धासे
कानंतरं तृतीयसवनस्यैवैतद्रूपं यल्लाजा इत्यादि श्रुतेः। अत्र चूर्णानां पयस
श्च संस्कारार्थत्वेनानेन देवतोद्देशेन ग्रहणादिर्न भवति ९॥ वेदिं मिमीते वरुणप्र
घासवत्। अत्र सौत्रामण्यां वरुणप्रघासवत् द्वे वेदी मिमीते। एकां दक्षिणां
अपरां उत्तरां प्रादेशः पृथग्वा तयोरंतराले दक्षिणस्यां प्रतिप्रस्थाता कर्ता

ते

से०भा० ७

एवं दक्षिणाग्नेरपरोत्तराणामादेशात् पर्योवातं पौरं तथा ले दक्षिणस्यावृति पश्चा
त्तावता एवमादिसर्वं बतिप्रत्ययेन गृह्यते देवे की भवतो द्वावावलोका वित्याहु
र्देवलोकश्चैव पितृलोकश्चैतत्तरां त्याभवतिदक्षिणास्यति श्रुतेः। उत्तरस्यावेदे
मानमपि वरुणप्रघासवत्प्राप्नोतीति तदपवादमाह॥ प्रक्रमतृतीयेनावृत्तेनो
त्तरार्धं सोमवत्। अत्रोत्तरां वेदिं प्रक्रमतृतीयेन सोमवदावृत्तेन मिमीतेति व
रुणप्रघासवत्। दक्षिणां तु वरुणप्रघासवदेव॥ प्रक्रमश्चात्र आग्निकस्त्रि
पदं पद्यात्रयपरिमाणः संनिधानात् तस्य प्रक्रमस्य तृतीयं तृतीयो भागः प्रक्र
मतृतीयं तेनाप्रक्रमशब्देन त्रिपदप्रक्रमप्रमाणपारज्यासाधितं समचतुर
स्रं नवपदक्षेत्रफलं क्षेत्रमभिधीयं तस्य क्षेत्रस्य समं त्रिधाविभक्तस्य पस्तृती
यो भागस्तस्य समचतुरस्रीकृतस्य करणी प्रक्रमतृतीयशब्देनोच्यते तेनो
त्तरस्यावेदेर्मानं कर्त्तव्यं कीदृशेन तेन सोमवदावृत्तेन आवृत्तिः संख्याप्रा
पितेन तेन त्रिंशत्पदारं चयत्रिंशत्पदारं वावृत्तेन पश्चात् वेदिमानं षड्विंशत्पदारमाव
त्तेन प्राक् चतुर्विंशतिवारमावृत्तेन न पुरस्तादिति तावदुक्तं भवति प्रक्रमपरि
माणं तत्र तृतीयं चैवं साधनीयं। प्रथमं पद्याप्रमाणं समचतुरस्रं कृत्वा तस्या
क्ष्णया द्विगुणा दीर्घ पद्याप्रमाणा भवति पंक्तिः एवं विधं द्वितीयं दीर्घचतुरस्र

राम ७

निर्यक्ष्याती १२ अस्याः क्षेत्रफलं ... निर्यक्ष्यातीः

प्रसाध्य तस्य दीर्घचतुरस्रस्याक्ष्णयारज्जुः सा प्रक्रमतृतीयपरिमाणा भवति।
तस्य रश्मिं तं काष्ठं कृत्वा तेन सोमवेदिसाधनं कार्यं अन्यत्र गर्भतायामपि सो
त्रामण्यां त्रिपदप्रक्रमत्वं तस्यैव तृतीयांशस्य समचतुरस्रीकृतस्य करणात्प्र
क्रममानं। तथा च काठके। सौमिक्या वेदेस्तृतीये सौत्रामण्या यज इति श्रुतेः
पदस्याक्ष्णयारज्जुः पार्श्वतः पादमात्रीति तिर्यक्कृतं तस्याक्ष्णयारज्जुः प्रक्रमस्थानी
या भवति तुल्यं सौमिक्याविधानमिति सामान्येनैवंविधस्यैवं प्रक्रमस्योपदेशा
त्॥ तयोः पश्चात् खरौ करोति तयोर्वेद्योर्मध्ये पश्चाद्भागे खरौ करोत्यध्वर्युरेवो
उत्तरस्यां पयोग्रहणां वसाग्रहणां चासादनार्थे दक्षिणस्यां सुराग्रहणामासा
दनार्थं एतच्च खरकरणं प्राक्स्तब्धापामो[illegible] उद्धता वा दितिसिकतोपकीर्णं कर्तव्यं
चतुरस्रमिति प्रागुक्तेन प्रकारेण ततः पश्चामायम्यस्प्रादिकरणीत्सायकत्तर
वेदिद्वारदेशान्तं कर्तव्यं॥ श्वः प्रणयनीयाधानादिकरणासाम्यासादनात्। चतु
रात्रमित्युक्तत्वाद्देन्द्रोणात्मेतिसरणाग्निलक्षणा च्यवति म्रणात्तुग्धेन तृतीयाया
मिति श्रुतेः अत्र श्वःशब्देन चतुर्थे यजनीयमहरुच्यते तयोर्ग्रामासोत्रमावा
स्यावा॥ अतश्चतुर्दश्यां प्रातरग्निहोत्रं हुत्वा हुतश्रोषं स्थापयित्वा श्रं छेद प त्वा
वित्रबंधनांतं समं चरुं कृत्वा आज्यं संस्कृत्य पयः पाहुत्यादि स्वरूनि ष्कास्तैं तं कुर्यात

दे०भा०
८

अत्र सोत्रामणीप्रभृतीनां हविर्यज्ञविधत्वात् पालाशापूप स्थ्यारत्नि अश्चतुररत्निर्वा
ततः षड्होताराहुतिः तत एव हेतोः। कर्कमते तु खादिरयूपः पंचारत्निप्रभृति पंचद
दशारत्निपर्यंतं ऋतुः। ऐकादशिनिधर्माः पशुगणे इति वचनात्। नात्र ष ट्टे ३
ताराहुतिरत एव हेतोः ततः षर्कसान मध्ये यो पंचकासादनं प्रतिप्रस्थातुर्
पवित्रच्छेदनादि उत्तरवेदिच्छादनांत उत्तरवेदिर्ध्वसोमिकीपुगमात्रीयजमानस्थू
पघाव। अपराह्णे हुतशेषमभक्षणं रात्रौ स्वयमेवाग्निहोत्रहोमः अतिरोगं गवां दुग्ध २
स्य सुरायामासेकः लाजचूर्णावपनं। अघरात्रे हुतशेषस्याशनं न भवति तस्मादु
पवसथेनाश्नीयादिति निषेधात्। ततस्त्रयाणां पयोग्रहाणाममर्थे त्रयाणां दुर्गीणा
मपाकरणं तत्राश्विभ्यां भागं सरस्वत्यै भागमिन्द्राय सुत्राम्णे भागमिति गेरूपस्य शर्णे
मंत्रविशेषः। ततः शाखोपगूहनं केचित्त्रयाणां ग्रहाणामर्थे एकस्यैव यद्दुग्धस्य
वत्सापाकरणमिच्छंति ततदुक्तं पुत्रानिरस्ता ततश्वः प्रभाते यजनीये हव्यधर्युः प्र
णयनीयाधानादि अग्निप्रणयनार्थस्य धान्यस्याहवनीये भ्याधानादारभ्यापश्चा
सादनात्। अर्बुदासादनांतं कर्म करोति॥ पश्वादि करोति दक्षिणास्यां वरुणप्रघास
वत् दक्षिणस्यां वेदौ वरुणप्रघासवत् सर्पादि सान्नाय्यासमादानादिकर्मध्वर्युर्वक राम ८
रोति वरुणप्रघासवदिति वचनात् दक्षिणस्यां पंचकासादनादेः प्रतिप्रस्था

उपा

तुः कर्त्तव्यं सिध्यति। चतुर्दश्यां तूत्तरावेदिरुत्तरवेदिछादनं ताभवति दक्षिणा
तूत्करकरणांते वा स्फ्यादानादेः ध्र्वोविधानात्। उत्करकरणांतेतरनुभयोर्वेधेः
रुत्तरकरणं सर्वेषांरेव भवति पंचदश्यां प्रथमं प्रतिप्रस्थात्रा स्फ्यादानादि
संमार्गांतं कृते प्राणायनीयाधानादि युगपदुभयोः भवति। सौरमेवास्या
अस्यां दक्षिणास्यां वेदौ केवलं सौरमेव कर्म भवति। सुराग्रहसंबध्येव कर्म भवति।
कुक्कुटं नान्यदारादुपकारकं ... ग्रहनन स्फ्योद्दक्यहरणप्रणीतो ... पात्राधारप्रया
जाज्यभागानुयाजादि एवकारेणात छादस्यतितं कुतः उत्तरेऽग्नौ यसुभिः पुरोडा ध्रु
शैः पयोग्रहैरिति श्रवरंति यदुचाम्यदिति श्रवणात् अग्न्यदिति सौरग्रहाणां न्यचे गाः८
ते। तान्यप्युत्तरणाग्नावेव भवंति एकतंत्रत्वात्। अतएवाह सूत्रकारः सौरमेवा
स्यामिति एवकारकरणात्तदंगान्युत्तरे एव। अत्रतु वेदिसंस्कारोपि संस्कारश्च
भवंति वेदिसंस्कारो मानादि स्तरणांतः अग्निसंस्कारकल्पनपरिधिपरिधाने
ध्माधानोपवाजनसंमार्गोदयः एतदुपयोगि च प्रतिप्रस्थातुः पयां ... सादं क्यात्रा४
नं भवति। पूर्वयरिग्रहे वा प्रतिप्रस्थातुः पयस्वसामंत्रणं -- अन्यत्रव
रुणप्रघासवद् ध्रुयैरेवामानवो वेदिकाले प्रतिप्रस्थाता दक्षिणातो वेदी
परवरं करोत्युत्तरतो ध पुंः पयोग्रहेभ्यो हूसीयां समाग्नीप्रणयतो दक्षिणतो

त्वे स्वाहरणे प्रे

२० भा०

दक्षिणाग्नेः प्रतिप्रस्थाता खरमुपयमनी कृत्वाधस्तात्सर्वौषधं खरस्य सादयति पाशुकानि पा

त्राणि प्रयुनक्ति दक्षिणस्मिन्खरे प्रतिप्रस्थाता त्रीन्आश्विनाननुपयामान्वालं द्रोणं श

तातरसं त्रीणि वायव्यान्युत्तरस्मिन्नध्वर्युः शष्पवित्रे त्रीणि वायव्यान्याज्यं यज्ञपात्राण्य प३

स्फहरति वेद्यामर्ध्वं सादयति खरे पयः सुराकलशं प्रतिप्रस्थातोत्तरदेशे आग्नीध्रमूर्धनि स्प४

सादयित्वा परेण विहारं दक्षिणातिक्रम्य खरस्मिन्खरे सादयतीति। अन्यत्र वरुणप्रघा

सदर्ध्युर्येव। अथ भ्रंश्वालाखरमपरेण चर्मावधाय परिस्रुतमासिच्य वालोत्तरमव

दधाति वालेन तत्त्वाचर्मणीमं त्रलिंगात्। अत्राप्यनिर्वापानंतरमुपसत्स्वादिपरिस्रु

त नांतां स्त्रीन्दोहानुत्वाप्याधिश्रयणघाप्या... सादनांतं कृत्वा दोहनं सुरायाश्रत

त्वाभिघारादि प्रसादनं नासादनालंभनादि कुर्यात्। सुरायां वाश्विनो सरस्वतीमिंद्रं

सुत्रामाणं गच्छेति प्रसादनं तस्याश्च दक्षिणावेदाव धर्येरेवा सादनालंभो। तत आत्मा

लंभोदकोपस्पर्शने। ततो दक्षिणावेदिखरमपरेण बहिर्वेदिस्थ भ्रंगर्त्ते खात्वा तत्रैव गो ग५

चर्मावधायपरिस्रुतं सुरां तत्र चर्मणापास्निच्य सुरायाउपरि वालोत्तरं वंशमयं पात्रं सुरा

गलनसमर्थं निदधाति एवं कृते मलस्त्वलेति च तिगलितासुरा वालोत्तरस्वोपयोत्या

ति। एकोयं गलनोपायः अथवाहवेचर्मणि वालोत्तरमवधायतत्र सुरामासिंचतित (हम

थासति च वालोत्तरान्निर्मणि सुरापतति। कृतएततामंत्रलिंगात्वालोत्तरेणादधत्येगवां ल

प४ रो२

चीति। मंत्रलिंगमप्यर्थप्राप्तस्य गलनोपायस्य क्रियामकं भवेदेवा। तस्मादयमेव पक्षः
साधीयान्॥ स्रुतामादत्तेसिंचतिपरिस्रुतचलीति कारोत्तरेणापूतां सुरां केनचिद्दर्थप्राप्तेन पा
त्रेणादत्ते चर्मणः सकाशा लितां सुरां गलत्यतिसिंचति परिस्रुचतीति मंत्रेण। सतेपु
नाति गोश्ववालवालेनपुनातितेपरिश्रुतमिति पुनातितेतिमंत्रेण तामात्तां सुरां सतेपा
त्रे शमलतिपात्रे गोवालैरश्ववालैश्चनिर्मितमवालेन पवित्रेण पुनाति सतशब्दः पात्र
वाची। तत्रकेचिद्धारणमाहुः। केचिद्यपालाशमिति। अथसोमातिपूतस्य सौत्रामण्यां पवि
शेषमाह। वायोः पूतस्य इति सोमातिपूतस्य सोमातिपूतस्य यजमानस्य वा यो पू
तः पवित्रेणप्रत्यङ्सोम इतिमंत्रेण सतेसुरां पुनाति। तथैवश्रुतत्वात्। वायोः पूतः पवि
सौ ८ त्रेणप्रत्य सोमः अतिद्रुत इति सोमातिपूतस्य पुनातीति। अथसोमवामिनः सौत्राम
ण्यां विशेषमाह। प्रणितेति तद्वामिनः वायोः पूतः प्राङ्सोम इति अनेनमंत्रेण तद्वामिनः सो
मवामिनो यजमानस्य सौत्रामण्यां सतेसुरां पुनाति। वायोः पूतः पवित्रेण प्राङ्सोम अ
तिद्रुत इति सोमवामिनः पुनातीति श्रुतत्वात्। सोमातिपूतसोमवामिशब्दौ व्याख्यातौ। उत्त
रस्यां वयो वैतसे जा विलोमपवित्रेणाब्रह्मक्षत्रमिति उत्तरस्यां वेदौ अजाविलोम पवित्रे
ण अजलोमभिर्मेषरोमभिश्चनिर्मिते न पवित्रेण वैतसे वतस वृक्षविकारे पात्रे पयः
पुनाति। ब्रह्मक्षत्रमित्यनेनमंत्रेण। ब्रह्मक्षत्रं पवत इति ययापुनासीति श्रवणात् ॥

दे० भा० १० वृस्तानुमंत्रणाम धूर्यो अद्रिभिरिति अधर्यो अद्रिभिः सुतं इति मंत्रेणाहूयमानस्याप
१० यसोवृत्ता अनुमंत्रणं करोतीति॥ पयो ग्रहान् स्तृतिः कुविदंगेति एवं सुरायाः पय
सश्च पावमान्स्कुविदंगेति मंत्रेणा धूर्युंत्रो पयो ग्रहान् गृह्णाति त्रयाणामपि ग्रहणो या ३
अयमेव मंत्रः। कुविदंग यवमंतो यवंचिदिति पयो ग्रहान् गृह्णातीति श्रुतेः एतद्
वपयो ग्रहाणामुत्ता तिर्वक्यं। मा च वर्स्मिकस्या श्चादमो देवता इति हरिस्वामिनः।
अत्र एते ग्रहयागाः प्रासंगिकाः त्रिपशुतंत्रमध्ये विधिश्रुतेः तदुक्तं। तं चेन्यस्यास मा
ध्रे रं यत्रान्यस्य विधिश्रुतः तत्र प्रसंग इति। तेन ग्रहदेवतानामावाहनव्यूहनादि सुकीर्त
नं न भवति। न पशुतंत्रे हविं षि नो घमानामिनि गमान्न भंते। न निगमाः संति पशुतंत्रे चो
घमानानामिति निषेधात्। न च सुरानिष्यत्यर्थं व्रीहिश्यामकोदनार्थं ग्रहणादि पदार्थों
नां सर्वं प्रवृत्तिदर्शनाद प्रासंगिकत्वं। हविः स्वरूपनिष्पत्त्यनुरोधेन सवनत्रय गतदीक्षा
न णाशाखाछेदं वत्सापाकरणादीनामिव सर्वं प्रवृत्तेर विरोधात्। पयादधो घ्यहनिष्पा
घत्वं एवं सुराया स्वाहनिष्पाघत्वं॥ पयग्रुपयामयोनी अत्र मंत्रसमाम्नाये उपया ५८
मगृहीतास्योश्वतयोनिरिति सहपठिते उपयामयोनी निग्रहे सुपघ्रन्व
तां ततश्चैवं कुविदंगेति पठिता उपयामगृहीतास्य श्विभ्यां त्वा। एष ते योनिस्ते
जसे त्वा द्वितीय ग्रहे पुनः कुविदंगेति पठिता त्रय यामगृहीतासि सरस्वत्यै त्वा एष ते यो राम १०

निर्वीर्यायत्वात्ततस्तृतीये ग्रहे पुनः कुविदङ्गेति पठित्वा उपयामगृहीतोसींद्राय त्वा सुत्रा
म्ण २ म्णे एष ते योनिर्बलाय त्वेति एवं उपयामयोनीष्वप्यूवत इत्यर्थः ग्रहयागानां दर्शपू
र्णमासप्रकृतित्वात् प्राप्ते वचनं अनेनानुप्रागुक्तेन पयेन हृत्यं। परिमार्जनं चात्र पात्रा लि ३
णां कार्यं श्रीतं पाणिनोपमज्य सादयतीति कठसूत्रात्॥ खरयोः सादनं गृहीतानां
पयोग्रहाणां सुराग्रहाणां च यथास्वं खरयोः सादनं भवति पयोग्रहाणां उत्तरख
रे। सुराग्रहाणां दक्षिणखर इति॥ आश्विनमाश्वत्थेनाश्विनं अश्विदेवतं प्र
थमं पयोग्रहमाश्वत्थेन पात्रेण गृह्णाति। कुविदङ्गेति मंत्रेण। पात्रांतरेण वैत
सान्यात्यय आद्ययोः खलस्योपर्यासिंचतीत्यर्थः आश्वत्थं पात्रं भवतीति श्र
तेराश्वत्थेनेत्युक्तं॥ गोधूमकुवलचूर्णानि चावपति तेजोसीति आसिन्नाश्विने
ग्रहे ग्रहणानंतरं सादनात्प्राग्दर्भतरेण प्रागग्रेणुदगग्रे वा ग्रहपात्रस्योपरिनिधा
य गोधूमचूर्णं कुवलचूर्णं निच सहैवावपति। तेजोसि तेजो मयि धेहीत्यनेन मंत्रेण गृ
हीतस्य पयसो मध्ये आवपति अथयेणां चेततं कुवलान्यामलके कुत्स्यानि बदराणि ग्रा ग्रा
म्येणा चान्नेनारेपि नच पयोग्रहे क्षीरेणा तेति श्रवणात्। तेन कुशावंतद्वीपे त्वाद
यः अथयणाधर्मा अत्र भवंति ग्राम्येण गोधूमो यवाकेयवचूर्णैः अरणेपि न कुवल
बदरकर्कंधुचूर्णैरिति। ततस्य तद्गतिखरे सादयति॥ सारस्वतमौदुंबरेणा सारस्व

तंसरस्वतीदेवतंद्वितीयंपयोग्रहमौदुंबरेणौदुंबरवद्धोमद्वेनपात्रेणगृह्णाति
कुविदंगेतिर्द्वेदुंबरंभवत्यूर्जमेवावरुंध इति श्रुतेः। नुपवाकबदरचूर्णानिचवीर्य
मसीति आसिन्सारस्वतग्रहस्यग्रहणानंतरमुपवाकचूर्णानिबदरचूर्णानिचा
वपतिप्रक्षिपतिवीर्यमसिवीर्यंमयिधेहीतिमंत्रेणउपवाकाइंद्रयवाजोधूम
वत्तुषरहितागोधूमचूर्णाय वसदृशास्तवभवंति आम्येणाचान्येनारण्येनचपये
ग्रहाच्छ्रीणातीसचोपवाकानांग्राम्यधान्यत्वश्रवणादेवसीयते।प्रसिद्धम्। बदरा
णिचराकबदराणीति एतदपिश्रपणमेव॥ ऐंद्रंनैयग्रोधेन ऐंद्रं इंद्रदेवत्यंतृ
तीयंपयोग्रहंनैयग्रोधेनवटमयेनपात्रेणगृह्णातिकुविदंगेतिनैयग्रोधंभवति
स्वधामेवावरुंध इति श्रुतेः॥ यवककर्कंधुचूर्णानिचबलमसीति यवचूर्णानिक
र्कंधुचूर्णानिचबलमसिबलंमयिधेहीत्यनेनमंत्रेण ऐंद्रेग्रहे आवपति।यवाः
प्रसिद्धाः कर्कंधूर्नामारण्यान्यनुपजीव्यानिबदराणि। कुवलकर्कंधुबदराणिसूक्ष्म
तरस्थूलमध्यमपरिमाणानिबदरजातिफलानीतिमाधवाचार्यः।कुवलंमध्यमेव
दरं कर्कंधुसूक्ष्ममतिसूक्ष्ममधरेपृथुत्तरापथेप्रायेण [illegible]
जायतेबदरंचेतिनिर्विवेणामिति [illegible]हरिस्वामिनः एवंपयोग्रहग्रहणमुपदिश्य अथ
सौराणांग्रहणप्रकारमाह॥ स्थालीभिः सौराग्नानाहिवामिति व्यत्यासंनेनाऐंवांदे

वहितमित्यनेनमंत्रेणस्थालीभिः त्रीन्सुराग्रहान्गृह्णातिनानाहिवांदेवहितंशं सद
स्कृतमितिसुराग्रहान्गृह्णातीतिश्रुतेः। एतदेवसुराग्रहाणांमुत्पत्तिवाक्यंमा
व त्रोर्णीतासूएवाध्यादयोदेवताः इतिहरिस्वामिनः सुराग्रहे याज्याअपिप्रासंगि
काएव। प्रागुक्तन्यायात्तत्रव्यत्यासः। प्रथममाश्विनंपयोग्रहं गृहीत्वा आसा
द्यततआश्विनंसुराग्रहं गृहीत्वासादनांतंकर्त्तव्यं। ततः सारस्वतंपयोग्रहं। ततः सा
रस्वतंसुराग्रहं। ततऐंद्रंपयोग्रहं ततऐंद्रंसुराग्रहमितिव्यत्यासशब्दार्थः द्वेचैतेप वै ६
योग्रहाविद्धसुराग्रहायेद्व्यतिषजन्नगृह्णीयादितिप्रजाभ्यव्यतिषजन्नगृह्णा
तीतिश्रुतेः स्थालीभिरितिकुतः स्थाल्योभवंतिपथिव्यावाअन्नाद्यमवरुंधे इ
तिश्रुतेः ताश्चमृन्मय्यएव। अग्रेपात्राशेसेणान्मन्मयमाहुतिमानश्नुइति
वचनमाराग्रत्वात्। अतश्चएवंमृन्मयीभिः स्थालीभिर्गृहीताः संतीतिप्रतीयते।
अत्रापिएवंवत्पयसाउपयामयोनीभवतः प्रथमेग्रहेनानाहिवामितिपठित्वा
उपयामगृहीतोस्याश्विनंतेजः इतिग्रहणं एषतेयोनिर्माध्वीपत्वेतिसादनं। सा
रस्वतेद्वितीयेनानाहिवामितिपठित्वाउपयामगृहीतोसिसारस्वतंवीर्यमितिग्रह
णं एषतेयोनिरानंदायत्वेतिसादनं तृतीयेऐंद्रेनानाहिवा उपयामगृहीतोस्यैं
द्रंबलमितिग्रहणं। एषतेयोनिर्महसेत्वेतिसादनं॥ ययोर्ग्रहान्यार्षवे अथवा

द०भा० १२

एवं प्रथमं त्रीनपि पयोग्रहानव्यवहिता नगृहीत्वा पश्चात्सुराग्रहान् गृह्णीतयेव
गच्छतियात ननु व्यत्यासं॥ सुराग्रहं गृह्णाति सोमोसीति वृकव्याघ्रसिंहलोम
भिः प्रतिमंत्रं मिश्रैः॥ वृकलोमभिर्व्याघ्रलोमभिः सिंहलोमभिः श्रामिश्रैः ओ ३
जोस्यो जामपि धेहीति प्रतिमंत्रं सुराग्रहं गृह्णाति रुं स्वा श्विनं मन्यसी
ति सारस्वतं सहोसीत्यैंद्रं मिश्रैरिति वृकादीनां त्रयाणामपि लोमभिर्मिश्री क्र
ते–न तु यथासंख्येनैकैकस्य लोमभिरित्यर्थः एतच्च श्रपणं गृहणानंतरं
प्राणसादनात्कर्तव्यं॥ सुराग्रहाणां परिमार्जनं श्येनपत्रेणाकार्यं तदुक्तं कठ
सूत्रे। श्रीतं श्येनपर्णेनोपमृज्य सादयतीति पयोग्रहाणां दुग्धाग्रेनेत्युक्तं॥
एके यथासंख्यं एके आचार्या वृकादिलोमभिर्यथासंख्यं संख्यानति क्रमेण
सुराग्रहाणां श्रपणं कुर्वंति। वृकलोमभिरश्विनस्य व्याघ्रलोमभिः सारस्वतस्य
सिंहलोमभिरैंद्रस्येति। सोमो राजेत्यनुवाकेन ग्रहानुपतिष्ठंते युगपत्। सो
मो राजामृतं सुत इत्यषष्ठैर्वनानुवाकेन युगपत्समानकालमेव ग्रहान्पयोग्र
हान्सुराग्रहांश्चाध्वर्युरुपतिष्ठेतोपदांतरमाह॥ चतुर्भिर्वा पयोग्रहो छेसेण
सौराते। अथवा सोमो राजेत्यादिभिश्चतुर्भिर्मंत्रैः पयोग्रहानुपतिष्ठते ततोनुवा
कशेषेणारेतो मूत्रमित्यादिना ज्र्म्भका द्व्यात्मकेन सौराग्रहानुपतिष्ठते॥ राम १२

12

दीक्षावसावयतोंतः पात्ले श्येनपत्राभ्यां याव्या घृमिति उपस्थानानंतरं ध्रुवं प्रति
प्रस्थाता रोसहैव अंतः पात्लेवस्थितं यजमानं प्राङ्मुखं याव्या घृमित्यनेन मंत्रे
ण श्येनपत्राभ्यां दीक्षावसावयतः दीक्षावादिस्येकेन श्येनपत्रेणानाभेरूर्ध्वं
दक्षिणं द्वितीयेन सकृदवैवाडिति। अयवोमाभ्यां पत्राभ्यां द्विनाभेरूर्ध्वमधश्च
सर्वांश्चीस्तंभान्परस्तात्त्रिष्टुप् चामेयुग्नं कुनिहंति सोंतः पात्ल इति शालायाः पू
र्वद्वारमध्यादारभ्य वेदेर्जघनार्धपुं कुपर्यंतोंतरालदेशोंतः पात्लशब्देनाभिधी
यते। तथा च श्रुतिः। अध्वर्युश्च प्रतिप्रस्थाता च जघनेन वेदिं प्राञ्चमावृत्तं यज
मानं श्येनपत्राभ्यामूर्ध्वं चावाचं चयावयत इति। अत्र वेदिजघनेनेति वेदेः
पश्चाद्भागे यजमानस्यावस्थानं श्रूयते सूत्रकारेण सोंतः पात्लशब्देनोक्तं।
अंतरग्नाहस ... कारः आज्यप्रोक्षणीरंतः पात्लदेशादुत्पूय पयश्चाज्यग्रह
णमिति अतः पात्लसंज्ञके देशे इत्यंतः पात्लशब्दो देशवाचिनेदर्शपतिनं शे
कुवाचिनं। एवमेव राजसूये पूर्वेणोपपंपरीत्यातः पात्लदेशे स्थापयतिमात इ
त्यपि व्याख्येयं॥ अग्निं प्रहरति यदापिये षति। तो ध्वर्युरग्निं प्रहरसि स ध्वे
षणायां यजमाने नाग्निं प्रहरयति। स च यजमानो ध्वर्युणा प्रेषितो यदापियेषमा
तरमित्यनेन मंत्रेणोत्तरवेदिकमग्निं प्रहरतो यजमान इति कुतः उत्तमपुरु नु

षयोगित्वान्मंत्रस्य ॥ पयोग्रहसंमर्शनं दं संपृचध्वमिति मंत्रलिंगाद्देवयजमा
नः संपृचध्वमिति मंत्रेणपयोग्रहाणां संमर्शनं आलंभनं सहैव करोति संपृचध्वं सं
मा भद्रेण पंक्तेति पयोग्रहान् संमृशतीति श्रुतेः ॥ विपृचध्वमिति सौराणां विपृचध्व
चिमा इति मंत्रेण यजमान एव सौराणां संमर्शनमालंभनं करोति बहुवचनात् सहैवावि
पृचध्वविमा पाप्मनार्थेत्येति सुराग्रहानिति श्रुतत्वात् । अध्वर्युरेव ग्रहसंमर्शनं क
रोती — त्यपरे ॥ श्रियै वैनं यशसा समर्द्धयति पाप्मने वैनं व्यावर्तयतीति श्रवणा
त् । पुक्तं चैतत् मंत्रलिंगत्वप्रयोजकं ॥ २ ॥ अभ्यादिकरोति । अभ्यासादनं तेवैक्ल
तंकर्माभिहितं अतोभ्यादानप्रभृति पांशुकं कर्म करोति ॥ आश्विनो धूम्रः । आश्वि
नोश्विदेवतोज छागो धूम्रो धूसरवर्णः प्रथमः पशुर्भवति सारस्वतं मेषमिति श्रु
तत्वात् । सरस्वती मे षजमित्यथ वा दात् स एतमश्विनं धूम्रमालभेतेति श्रुतेः ।
ततश्च अश्विभ्यां जुष्टमिति नियोगादेः प्रयोगः ॥ सारस्वतो मेषः । सारस्वतः
सरस्वती देवताको मेषो द्वितीयः पशुर्भवति होताय क्षत् सरस्वतीमेषस्येत्या
दि मंत्र लिंगाच्च सारस्वत सरस्वत्या देवतात्वं निश्चीयते नच्च सरस्वतः ततश्च
सरस्वत्यै जुष्टमिति नियोगादेः प्रयोगः ॥ ऐंद्र ऋषभः ॥ ऐंद्र इंद्रदेवत ऋषभस्तृ
तीयः ऐंद्रमृषभमिति श्रुतेः ततश्चैंद्रौ जुष्टं इति प्रयोगः तस्मादाश्विनो धूम्रो

पशुर्भवति १ वा १

भवति तस्मात्सारस्वतो मेषो भवति तस्मादैन्द्र ऋषभो भवतीति त्रौणीत्रयाणां पशु
यागानां सौत्रामणीशब्दव्याख्यानामुसन्ति वाक्यानि इति हरिस्वामिनः तत्र रत्ने च॥
अस्यां हि सौत्रामण्यां प्रधानभूताः पशुयागा आम्नायत इति। काठके सहपशूनुपा
करोत्याश्विनमजं सारस्वतीं मेषीमैन्द्रमृषभं वा वत्सिं वेति। एकादशिनिधर्माः पशु
गणो षित्व तिवक्ष्यमाणत्वादत्रैकादशिनिधर्मा भवंति एकादशिनी चाद्विविधा। एकयूपाप्र
तिपशुयूपा च। अत्रापि तदुभयं वै काल्पिकं प्राप्नोतीत्यतो नियमार्थमाह॥ मध्ये यूपः।
अस्यां त्रिपशौ यूपो मध्ये भवति अतश्चात्र एक एव यूपो भवति न प्रति पशु। ततश्चा ए
कयूपाया एकादशिन्या अत्र धर्मप्राप्तिः तेन तद्वदेव प्रथमस्य यूपे बंधनं तस्य ग
स्प ७ ले द्वितीयस्य गले तृतीयस्येति वं गलिकान्यायेन नियोगः॥ दक्षिणोत्तरावैन्द्रवा
योधसयोः। अस्मात्त्रिपशुयूपाद्दक्षिणोत्तरावैन्द्रवायोधसयोर्यूपौ भवतः। दक्षिण
ऐन्द्रस्य। उत्तरो वायोधसस्य। स वाऽरय आलैवयत्सौत्रामणीतस्मात्सोग्निरुक्तानिरुक्तो
ह्यात्मालोलो वयोधास्तस्मात्सोऽनिरुक्तोग्निरुक्तोऽलिलोक अमा वै यज्ञस्य सौत्रामणी
बाहू ऐन्द्रश्च वयोधाश्च तद्यदेतावभितः पश्व भवतस्तस्मादिमावात्मानमभितो बाहू
यथा वै पशुरेवं यूपस्तद्यदेतऊं सौत्रामणीकं यूपमेतौ यूपावभितो भवतस्त
स्मादिमावात्मानमभितो बाहू इति श्रुतत्वात्। येषां देशा ध्यवसानं कर्त्तव्यं

त

दे॰भा॰ १४ यादशेदेशेमध्येत्रिपशोरनु[illegible]नंद्विरोत्तरदेशेवैंद्वायोधसपभ्योरनुष्ठानंसंभ
वतीतितात्पर्यं॥ वपामार्जनांतेग्रहानादायसर्वदनुवाचनं सुरासोमेभ्योनुब्रूही
ति। सर्वोक्तानंत्रयाणां पश्वूनां वपामार्जनांतकर्मणि कृते वपायागात्सुराग्रहौ तौ च
त् यजप्रैष्यावाज्यभागावुष्यत्रानुष्ठाय ततः पयोग्रहानादाय सर्वदज्ञाजस्त थि
कचरकसौत्रामणोव द्वेवतापदान्यविभक्तिलोपेनैवसमस्यानुवाचनमध्वर्युः क
रोतितत्रविशेषः। अश्विभ्यां सरस्वत्यै [illegible]इंद्राय सुत्राम्णे सुरासोमेभ्योनुब्रूहीति।
प्रतिप्रस्थाताव धर्युणासहैवपालाशेषु लस्वलेषु स्थालीस्थान्सौरग्रहान् सि
च्यादायद्विरोग्रौ हौमार्थं गच्छति। कर्कमते पश्वूनामेकादशिनिधर्मत्वेन सव
विधत्वाद्वृतोपायनीनादीनां निषेधस्तेग्रहयणानां दर्शपूर्णमासधर्मत्वे
नतत्संनिधाने एव वृतोपायनादीनामनुष्ठानं पुनः वासुदेवश्री अनंतयाज्ञिका
नां मते तु सौत्रामण्यां हविर्यज्ञत्वात्तु तत्पश्वूनां हविर्यज्ञविधत्वात्तत्र च आज्यभा
गयोर्वैकल्पिकत्वादत्रापि वपायागात्सुराग्रहयागात्पुरा वातयोरनुष्ठानं भवति॥
सप्रैषं तु आम्नाय प्रैषे अपि विशेषः। स प्रैषं प्रैषवचनं भवति। तुशब्देराज
सू[illegible]काभ्देदमाहतच्चैव[illegible]तः। समस्यानुवाचनं यजेति चेति। नात्र तथा किंतु सप्रै
षं। यजेत्यस्य स्थाने प्रेष्येति वक्तव्यमित्यर्थः॥ प्रस्थितमिं चोनकेवलं प्रेष्येत्से राम १४

तु

षगवविशेषः। किंतु प्रस्थितशब्दप्रयोगोपि भवति तेनाग्निष्टोमार्थे सरस्वत्यां द्रा ३१
पसुत्रामेऽसुरासोमान्प्रस्थितान्प्रेष्येत्येवं प्रयोगः॥ त्रिपशोः सर्वं। त्रिपशोः सर्वं प्र
स्थितशब्दवद्भवति। ननु चात्रैकादशिनिधर्मप्राप्त्या प्रस्थितशब्दः प्राप्नोत्येव॥
किमुच्यते त्रिपशोः सर्वमिति। उच्यते नियमार्थं पुनर्वचनं। अत्रैव प्रस्थितशब्दो
नान्यत्र पशुगणेष्वं च पश्चतुष्पश्वादाविति। सर्वग्रहणं पशुपुरोडाशार्थमिति या
ज्ञिकाः वासुदेवभट्टास्तु पार्थं सर्वग्रहणमिति केचित् तदनुपपन्नमिव त्रिप
शोश्चेत्येतावतैव तत्र प्राप्तेः सर्वग्रहणं वैयर्थ्यात्। अतः पशुपुरोडाशार्थमेव स
र्वग्रहणं। अथवा सौत्रामण्यां हविर्यज्ञत्वेन तत् [illegible] नाहविर्यज्ञविधत्वात् तु पद दूर
शिकव्यतिरिक्तो कादशिनिधर्मणामग्रहणात् ब्धाः सर्व प्रस्थितशब्दे वचनं त्रिप
ति६ शोः सर्वमि। यत्र यत्र यशो प्रस्थितशब्दो दृष्टः तत्सर्वं प्रस्थितशब्दवद्भवति। अ
तश्च वपायागे हृदयाद्यंगयागे चानपशुपुरोडाशे॥ सुरावंतमिति जुहोति।
अध्वर्युः सुरावंतं बर्हिषदमिति मंत्रेणाग्नये हंसो नत्रिसहैव जुहोति।
सुरावंतमिति श्रुतेः॥ पालाशैः सौत्राम्यमाहुतिमानशद्धति श्रुतयैस्तउ
ति। यस्ते रसः संभृत इति मंत्रेण पालाशैस्समृत्खलैः प्रतिप्रस्थाता दक्षिणाग्नौ
सौत्रान्सुराहान अथ्यैर्युगाम्लिहैव जुहोति। पालशैः कृतः। स्थालीभिरेव कृतानजु

ग्रा२ ध्वा२ दूर२

उ१

दे॰भा॰ होतित्र्चहे [illegible] माहैन मन्त्रमिति। मन्त्रयं यात्रं आहुतिं न आनशेन व्याप्नोतीति
१५ श्रवणात्। तद्धुहुयं द्विनेस्पले द्विभ्यो जुक लथकस्मादेतं मन्त्रयेनैव [illegible] जु
होतीसतीवा क्वादेवं ज्ञायते यद्यानस्पलं देवानां होमसाधनयोग्यं मन्त्रयं वा
योग्यमितिय तो अन्यस्य पात्रस्य कारणतिरवशेन होमकरणत्वासं [illegible] वेमन्त्र म४
य५ येनहोममाहोसं घानस्पलं स्वादित्यादिना अपिचात्र पालाशान्यकाशपानि
भवंतीति श्रूयते तेष्वेतस्मोर यहोमो नक्रियनेत दातेयामद्रष्टार्थता स्यात्।
जा॰ए नचसायुं [illegible] ते द्रष्टार्थत्वे सति। तस्मात्पालाशे रेवसोरहोमः कार्यं॥ अध्व
र्युः प्रतिप्रस्थाताग्नीध्रमश्विनेत्याश्विनं भक्षयंति द्विर्द्विरावर्त्तं॥ अध्वर्युः प्र
तिप्रस्थाता आग्नीध्र एते त्रयोपमाश्विनान मुच्चरित्वनेनमंत्रेणाश्विनं पयो
ग्रहं भक्षयंति द्विर्द्विः। रित्येतावतैवावत्वा भक्षणं प्राप्नोति। किमुच्यते। आवर्त्तमि
ति सत्यं। स्वस्थानविवृद्धिन्यायेन सममनंतरमेव प्राप्तिनदंडकलितवदावृत्तिव
त। तेन च पारणक्रमेण सक्रमद्वरणं। ततः पुनरावृत्त्यां द्वितीयवारं भक्ष
णमित्येवमर्थमावर्त्तमितिपदं। आश्विनमध्वर्य्यवो भक्षयंति त्रय आश्वि
नभक्षयंत्यध्वर्युः प्रतिप्रस्थाताग्नीध्र इति पुनरभिनिवर्त्तमत्विजो भक्षयंतो एम
ल१ तिच श्रुतत्वात्॥ होतृब्रैमैत्रावरुणाः सारस्वतमाश्विनवत्। होत्रब्रह्मम १५

एवत्वे महत्वसाम्याद्द्रव्यसाधारण्याच्च सोमवदेवसोपहवं भक्षणं॥ हस्ते पयोग्रहीत्वा भक्षयंति॥ एकैकोद्विर्भक्षयंति॥
नतिरं तरं किंतु आवर्त्तं। आवर्त्य आवर्त्य। पूर्वमध्वर्युः। ततः प्रतिप्रस्थाता ततोग्नीत्॥ अनेन क्रमेणैकवारं सर्वे भक्षयं
ति पुनरप्यनेनैव क्रमेण द्वितीयवारमित्यावर्त्तमित्यस्यार्थः। ननु गृ॰ [illegible] =तुदि=

त्रावरुणा। आश्विनवत्सारस्वतं ययोग्रहं द्रव्यसाध्वर्य्य रणपात्सो एहवं भक्षयंति। आ
श्विनवदितियमाश्विनेति मंत्रेणाद्विर्द्विरावर्त्तमिति सारस्वतं होताब्रह्मा मैत्रा
वरुणा इति चयः सारस्वतं होता ब्रह्मा मैत्रावरुणाविति च श्रुतेः॥ शेषं शेषमा
सिंचत्युत्तरे पूर्वस्योत्तरं पूर्वस्य ग्रहस्य भक्षितस्य शेषं उत्तरे उत्तरे आसिंच
त्यवनयति। आश्विनस्य शेषं सारस्वते सारस्वतशेषमैंद्रे आश्विनात्सारस्व २५
तेवनयति सारस्वतादैंद्र इति श्रवणात्॥ शेषं शेषमिति ग्रहाये क्षपावीक्ष्या
नभक्षणाय सह या। तेन सर्वे भक्षंति सकृदेव शेषासेकः। शेषासेकानंतरमु
त्तरस्य भक्षणमिति॥ ऐंद्रं यजमानः ऐंद्रं पयो ग्रहं यजमान एवैकोयमश्वि
नेति मंत्रेण भक्षयति सकृदेव न समाधारणपात्र श्चानुप एव वा ऐंद्रं यजमानो हू १
भक्षयति। राकावैंद्रं यजमानो भक्षयतीति तथा षड्रृत्विजो भक्षयंति षो
दश्य एवाभवतिपुनः पुनरभिनिवर्त्तमृत्विजो भक्षयंति च षोदश यजमा
नो भक्षयतीति च श्रुतत्वात्॥ यद्वत्रेति सौत्राम्णी ह पंतिययाभक्षितं प्राची
नावीति नोदक्षिणातः एतत एवा धूर्यो दयोयजमानी तायद्वरिष्टमिति मं
त्रेणाविहारस्य दक्षिणात उपविष्टाः प्राचीनावीतिनः कृतापसव्याययाभ
क्षितंपयोग्रह भक्षणोतिकर्त्तव्यता नातिक्रमेण सौत्राम्ण्य ग्रहान्नावयंति। सभक्ष

दे भा० यद्वै यदत्र रिप्तमिति श्रुतत्वात्। सहान्यमैत्रिमभक्षणे अयमेव मन्त्रः। अध्व
१६ र्युः प्रतिप्रस्थाता आग्नीध्रस्तेत्रयः सौत्रामिण्यामश्विनं द्विर्द्विरात्तं भक्षयं। ततः
सारस्वतं तच्छेषाशेषकः ततः सारस्वतस्य सुराग्रहस्य होता ब्रह्मा मैत्रावरुणानांच
द्विरावर्त्तं भक्षणं। ततः ऐन्द्रशेषाशेषकः। अत्रापि द्रव्यस्याधारपात्रासोपहवं भक्ष
ग्र१ णं। ततः ऐन्द्रं सुराग्रहं एक एव यजमानोनुपहूय वा भक्षयति।। घ्राणभक्षमे
के। एकेषामाचार्याणां सौरग्रहाणां घ्राणभक्षं अवघ्राणमात्रं कुर्वंति न मुखेन भ
16 क्षणमिति।। परिक्रीतावावैश्यराजन्ययोरन्यतरं अथवावैश्यराजन्ययो
मध्ये अन्यतर एको वैश्यो वा क्षत्रियो वा परिक्रीतो मूल्येन क्रीतः सौरग्रहं भ नत्र ८
नाए क्षयति नर्त्विग्यजमानौ। तद्धितदन्ये धूर्य वा राजन्यं वा वैश्यं वा परिक्रीणंति
स एतं भक्षयिष्यतीति श्रवणात्। एवं सुराग्रहभक्षपक्षे पक्षत्रयं ऋत्विग्यज
ना५ मानानां घ्राणभक्षः प्रत्यक्षं।। भक्षो वा परिक्रीतस्य वा वैश्यराजन्ययोरन्यतरस्य भ
क्षो नर्त्विग्यजमानानामिति। अथ पदोत्तरमाह।। अंगारेषु बलिहिष्यति [illegible]धि
दक्षिणातो जुहोत्याश्विनमुत्तरे मध्ये सारस्वतमैन्द्रं दक्षिणे पितृभ्य इति प्रति
मंत्रं अथ पूर्वांसि निधानाद्दक्षिणासेवाहवनीयस्यांगारेषु बलिहिष्यति ध्येयपरि राम
धे बलिः प्रदेशाद्दक्षिणतो दक्षिणस्यां दिशि स्थापिते पुदक्षिणं संस्थेषु १६

ज

पितृभ्य इति प्रतिमंत्रं सुराग्रहान्होमावशिष्टान्जुहोति कथं॥ आग्नि नं सौ
ग्रहमुत्तरे गारे पितृभ्यः स्वधायिभ्य इति मंत्रेण प्राचीनावीती दक्षिणाभिमु
खः सन्नध्वर्युर्जुहोति। मध्यमेंगारे पितामहेभ्य इति सार स्वतं सुराग्रहं तथैव
जुहोति। दक्षिणांगारे प्रपितामहेभ्य इति मंत्रे णैंद्रं सुराग्रहं जुहोति दक्षिणा स्वे
वाग्नेस्त्रीनंगारान्निर्वर्त्य बर्हिषद इति वक्ष्यमाणमंत्रेणाभिज्वलयेत् पितृभ्य इति
श्रुतत्वात् अत आरभ्य ब्रह्मयजमाना ध्वर्यवः प्राचीनावीतिन एव कर्म कुर्युः
दक्षिणामाये समाना स्वाहुति होम पर्यंतं॥ अत्र पितर इति प्रक्षालनेनोपसिंच
ति। अत्र पितर इति प्रतिमंत्रं प्रक्षालनेन सौत्रग्रहहोमपात्र प्रक्षालनोदकेन पयसा
स्वतन्त्रांगारानुपसिंचति होमक्रमेणोवात त्र्योपसेचनमुलखलमुदकमासिच्यो
लूखले एवकर्मं अप आनीय निनयत्यत्र पितर इत्यादि श्रुतत्वात् तथा आ
नु पूर्वमेवैनान्सर्वान्भावयतीति॥ पितरः शुंधध्वमितिजपति। प्रक्षालनेनां
गारोपसेचनानंतरमध्वर्युः पितरः शुंधध्वमिति मंत्रं जपति॥ कुंभी मासञ्चकुंभ
वत्छतवितृण्णां बालपवित्रहिरण्याण्यंतर्धिनवर्चं वाचयति पुनं तु मेति। तत
श्चरकसौत्रामणीकुंभवत्छतवितृण्णां कुंभीमासञ्चदक्षिणास्याहवनायस्यो परि
शिक्ये छत्वा बालपविचहिरण्यानि अंतर्धाय कुंभ्यां स्तालेनिधायतत्रयरि स्रुछे

दृ० भा० ९७

कमासिंचेत। ततस्तस्यां सुरायां अग्नेरुपरि स्रवंत्यां पुनंतु मेति नवर्चमध्वर्युर्यजमानं वा
चयति कुंभवदिति वतिना दक्षिणस्याग्नेरुपर्युपरि कुंभीभिः क्षेप्ये तु लायपरि स्रुक् छेयम
नसिंच्य स्रवंतीमिस्पेतावद्भाते। नवछिद्रतापितद्धदेव वैक[illegible]कोषापृतीतितेनश ल्पि ३
17 तवितस्माभिति नियमभूतो वालपवित्रहिरण्यानीति वालो गोऽश्ववालनिर्मितः सु
५५ रागलनं। पवित्रमजाविलोमनिर्मितं योगलनार्थं पर्वं गमतु तदेव। हिरण्यं प्रसि
द्धमेव। त्रिभिः पवित्रैः पावयंतीति प्रकृत्य पावमानीभिः पावयंति तिसृभिस्तिसृ
भिः पावयंति नवभिः पावयंति पवित्रेण पावयंत्यजाविकस्य वा एतद्रूपं यत्प
वित्रमजाविके नैवैनं पुनंति वालेन पावयंति गोअश्वस्य वा एतद्रूपं यद्वालो गोअश्वे
नैवैनं पुनंति हिरण्येन पावयंति सुरापापावयंतीति च श्रुतत्वात् अत्र दक्षिण
स्याहवनीयस्य समीपे दक्षिणोत्तरे द्वे स्थूणे निखायते योरुपरि पिधलाद्दक्षिणा
ग्रं वंशं निधाय तस्मिंच वंशे दक्षिणस्याहवनीयस्योपरिष्टात्समीपरवाय
मानं शिक्यं बध्नीयात्। ततः शिक्ये शतछिद्रां कुंभीं निधाय कुंभीमध्ये बालवि ५
त्रहिरण्यानि निधाय सुराशेषमासिंचेत ततः सुरायामग्नेरुपरि स्रवंत्यां
यजमानं पुनंतु मेति नवर्चं वाचयेत वाक्यभेदात् प्रसवं वा वचनं। हिरण्यं राम
च शतमानं प्रातःसवले शतमानं भवतीति श्रुतेः। सुरां शालायन्यजे मा ९७

लेखाय ४

नंवाचयेदिति हरिस्वामिनः ई[illegible]मेवर्चनु खुध्यं। सोमवतांबर्हिषदामग्निष्वात्तानां चानव
र्चंवाचयतीतिशेषः। त्वं सोम प्रचिकित इति आदि सोमवतामन्त्राणां च बर्हिषद पितर इ
त्यादि बर्हिषदां च एवं। आयं तु न इत्याद्यग्निष्वात्तानां च मिति एते त्रिभिस्त्र्यचैर्द्धृतीयां न
वर्चं भवति। अत्रापि वाक्यभेदात्स्व स्वमेव वाचनं।। केचिद्देरतामव इति च सोमव
तां च माहुस्तदनुपपन्नं तत्र सोमशब्दस्याभावात्। त्वं सोम प्रचिकित इत्यादिके त्र्यचे
तच्छब्दावाद्यायं तु न इत्यादिकमग्निष्वात्तानां च मिति हरिस्वामिनो माधवाचार्याः श्री
अनंतयाज्ञिकाश्च। तेन त्वं सोम प्रचिकित इत्यत आरभ्य तत्र्यं कल्प्य यालोत्तं तस्य संल
ग्नस्यैव नवर्चस्यैतद्वाचनं।। हुवं वसोमाति हुतश्चेत्। हुवं वीर्हि सोमाति हुतस्य सोत्राम
एयुक्ता। सोमाति हुतस्य सोमवामिभमिति।। अधुना तद्विशेषमाह। सोमातिहुतश्चे स्प
द्यजमानस्तदा सोमवदादिभ्यश्चैः हुवं वत चरक सौत्रामणीव कुंभ्याः स्त्रवंति सुरां यति मु ६
ष्वते। अस्याप्याद्यस्य नवर्चस्य वाचनमेव। ये समाना इति यजमानो जुहोति ततः स
त्रं हुहोत माज्यजुह्वां गृहीत्वा यजमानो दक्षिणामुखः प्राचीनावीती दक्षिणाग्नौ समि
त्यविकामाज्याहुतिं जुहोतीति ये समानाः समानसः पितर इति मंत्रेण। इदं पितृभ्य इ
ति त्यागः। आज्याहुतिं जुहोतीति प्रकृतस्य सजुहोतीति प्रकृतस्यैव सजुहो ये समान इति
कृतत्वात्।। उत्तरे च यज्ञोपवीत्युत्तरया।। ततो यजमानो यज्ञोपवीती कृतसव्य उत्तरे

दृ२

दे०भा० ग्नौ अति प्रणीते उत्तरवेदिकाहवनीये उत्तरयाद्वितीययायेसमानाइत्यनयर्चा
३८ मन्त्रो[illegible]हीतामाज्याहुतिं समित्पूर्विकां जुहोति इदं श्रियाइतित्यागः। सर्वे यज्ञोपवीत
निकृत्वोत्तरमग्निमुपसमायंतीत्युक्त्वा आज्याहुतीं जुहोति स जुहोति ये समानाः
समनसो जीवा जीवेषु मामका इति श्रुतत्वात्। अरेव चास्य होमस्य मंत्रवर्णाद्देव
